## प्रथमः विभागः सुगमसंस्कृतम् । ०८

प्रश्न .१ .अ) चित्रं दृष्ट्वा नामानि लिखत। (५तः४) ४

१)  २)  ३)  ४)  ५) 

आ) सङ्ख्याः अक्षरैः /अङ्कैः लिखत। (३तः२) २

(१) एकोनविंशतिः (२) षडशीतिः (३) ९५

इ) समय - स्तम्भमेलनं कुरुत। २

| अ | आ |
|---|---|
| १) पञ्चोन - द्वादशवादनम् | ७.२० |
| २) पञ्चविंशत्यधिक - द्विवादनम् | ११.५५ |
| ३) पञ्चाधिक - द्वादशवादनम् | २.२५ |
| ४) विंशत्यधिक - सप्तवादनम् | १२.०५ |

## द्वितीयः विभागः गद्यम् २०

प्रश्न .२ .अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। ७

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्राम पूर्णानदीतीरे वर्तते । तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरूः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरूः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरूमुपागच्छत् । तत्र वेद – वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः सन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरूचिं दृष्टा आर्याम्बा चिन्तामग्ना जाता ।

१) अवबोधनम् (४ तः३) ३

अ) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१)आर्याम्बा चिन्तामग्ना जाता यतः - . . . . . . . . . . . ।

(शङ्करः ऐहिकविषयेषु अरूचिं प्रदर्शयत्। / शङ्करः ऐहिकविषयेयु रूचिं प्रदर्शयत्।)

आ) पूर्णवाक्येन उत्तरं लिखत।

गुरूमुपगम्य शङ्करः किम् अधीतवान् ?

इ) वाक्यं पुनर्लिखित्वा सत्यं/असत्यं इति लिखत।

शङ्करः अतीव मूढः बालकः ।

ई) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?

२) शब्दज्ञानम्। (३तः२) २

अ) गद्यांशात् द्वे ल्यबन्त अव्यये चित्वा लिखत।

आ) प्रश्ननिर्माणं कुरूत - <u>मात्रा</u> शङ्करः आदिष्टः।

इ) उत्तरपदं लिखत।

१) चास्ताम् =च + . . . . . . .।   २) बालकोऽयम् = बालकः + . . . . . . .।

३) पृथक्करणम्। जालरेखाचित्रम् पुरयत। २

शङ्करस्य

जन्मकालः . . . . . . .

पिता . . . . . . .

जन्मग्रामः . . . . . . .

माता . . . . . . .

प्रश्न.२.आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः करूत।

सर्कसस्वामिनः विवशता मया अवगता। यदृच्छया प्राप्तः अयं परोपकारस्य अवसरः इति मत्वा तस्य साहाय्यं करणीयमिति मया निश्चितम्। भल्लूकवेषे अब्दुलः शोभेत इति मत्वा सः भल्लूकपात्रे नियोजितः। व्याघ्रस्य अभिनयार्थम् अहं स्वयमेव सिद्धः। एवं पात्रयोजना निर्धारिता।

कार्यक्रमात् प्रागेव अहं तथा अब्दुलः व्याघ्रभल्लूकवेषौ धृत्वा स्वपञ्जरयोः समुपस्थितौ। मम पञ्जरस्य पुरतः एव अधिकः सम्मर्दः जातः। यावच्छक्यम् अहं जनान् रञ्जयितुं प्रयत्तवान् किन्तु जनाः न सन्तुष्टाः। ''किमयं व्याघ्रः? कृशोऽयम्'' इति उपहासेन अवदन्। तदा एव एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता। मम गर्जनया बालः भीतः अतः सा माता मयि पाषाणखण्डान् अक्षिपत्। तदा वेदनया बाधितः अहं क्षणं यावत् व्याघ्रः न वदति इति विस्मृत्य अवदम्,

''दृष्ट्वा पञ्जरस्थितान् व्याघ्रान्, महिलाः क्षिपन्ति पाषाणखण्डान्।''

मम वाक्यसमाप्तेः पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छिता सा महिला 'भूतोऽयं भूत'...इति उच्चैः आक्रोशन्ती भूमौ पतिता। मम पुत्रः राघुः अपि एकवारं पञ्जरसमीपम् आगत्य, ''आप्पा! चायं पातुम् इच्छति किम्?'' इति यदा पृष्टवान् तदा प्रेक्षकाः सम्भ्रान्ताः एव।

१) अवबोधनम् (४ तः३) ३

अ) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१) जनाः व्याघ्रात् न सन्तुष्टाः यतः - . . . . . . . . . . .।

(१) जनाः सिंहं द्रष्टुम् इच्छन्ति। (२) व्याघ्रः अतीव कृशः आसीत्। (३)व्याघ्रः मनोरञ्जनं न करोति।

आ) पूर्णवाक्येन उत्तरं लिखत।

महिला केन कारणेन मूर्छिता ?

इ) वाक्यं पुनर्लिखित्वा सत्यं/असत्यं इति लिखत।

अब्दुलः व्याघ्रस्य अभिनयार्थ सिध्दम्।

ई) कः कं वदति ?

''चायं पातुम् इच्छति किम् ?

२) शब्दज्ञानम्। (३तः२) २

अ) प्रश्ननिर्माणं कुरूत।

भल्लूकवेषे <u>अब्दुलः</u> शोभेत।

आ) लकारं लिखत - माता मयि पाषाणखण्डान् <u>अक्षिपत्</u>।

इ) सन्धिविग्रहं कुरूत। कृशोऽयम् = . . . . . .+ . . . . . .

३) पृथक्करणम्। २

गद्यांशस्य आधारेण घटनाः क्रमेण योजयत।

१) माता व्याघ्रे पाषाणखन्डान् अक्षिपत्।

२) व्याघ्रस्य पुरतः सम्मर्दः जातः।

३) व्याघ्रस्य मनुष्यवाण्या भाषणेन महिला मूर्छिता।

४) व्याघ्रस्य गर्जनया बालः भीतः।

प्रश्न.२.इ) माध्यमभाषया सरलार्थं लिखत। (२तः१) ४

१) शक्रः - महत्तरां भिक्षां याचे ।
कर्णः - महत्तरां भिक्षां भवते प्रदास्ये । गोसहस्रं ददामि ।
शक्रः - गोसहस्रमिति? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण, नेच्छामि ।
कर्णः - किं नेच्छति भवान्? अपर्याप्तं कनकं दास्यामि ।

२) **रदनिका** – एतेन प्रतिवेशिक-दारकस्य सुवर्णशकटिकया क्रीडितम्, तेन च सा नीता, ततः पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणति..'रदनिके! किं मम एतया मृत्तिका-शकटिकया, तामेव सौवर्णशकटिकां देहि' इति ।
**वसन्तसेना** – हा धिक्, हा धिक् । मा रुदिहि, तद् गृहाणैतमलङ्कारम्, सौवर्णशकटिकां घटय ।
(इति दारकमादाय निष्क्रान्ता रदनिका ।)

ई) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः?

२) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान् ?।

## तृतीयः विभागः पद्यम् १८

प्रश्न.३.अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।

१) पद्यांशं पठित्वा निर्दिष्टे कृती कुरूत। (३तः२) २

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम्।
ददति जलमनल्पास्वादमाजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति॥
यथा चतुर्भिः कनकं परीक्षते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरूषं परीक्षते श्रुतेनशीलेनगुणेन कर्मणा॥

क) पूर्णवाक्येन उत्तरं लिखत।
साधवः किं न विस्मरन्ति ?

ख) चतुर्थपदं लिखत।
अल्पम् : तोयम् :: कृतम् :: ........

ग) सन्धिविग्रहं कुरूत।
१) जलमनल्पास्वादम् = ........+........।

२) जालरेखाचित्रं पूरयत। २




आ) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) मनूष्यः स्वकर्मणः किदृशं फलं लभते ?
२) 'येन केन प्रकारेण' इति उक्ति स्पष्टिकुरूत।

इ) पद्ये शुध्दे पूर्णे च लिखत। (क,ख तः १,/ग,घ तः १) ६
१)(क) विद्या . . . . . . . . . . . पशुः॥ अथवा (ख) अयं . . . . . . . . . निर्धनो वा॥
२)(ग) यत्र . . . . . . . . द्रुमायते॥ अथवा (घ) तावद् . . . . . . . यथोचितम्॥

ई) अन्वयं लिखत। २
. . . . आत्मनः मुखदोषेण . . . .। तत्र . . . . न बध्यन्ते। (अतः) . . . . सर्वार्थसाथनम्।

उ) सरलार्थ लिखत। (३तः२) ४
१) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्॥
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः॥

२) एकीभूय यथा सर्वे वर्णाः गच्छन्ति शुक्लताम्॥
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम्॥

३) वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः॥
तान् शिक्षयन्ति सततं ये सदा वाचने रताः॥

## चतुर्थः विभागः लेखनकौशलम् ९

प्रश्न.४.अ) धातूनाम् /अव्ययानाम् उपयोगं कृत्वाः वाक्यनिर्माण कुरूत (६तः४) ४
१) बहिः २) विना ३)स्निह् (४ प.प) ४) समीपे
५) रूच् -रोच् (१आ.प) ६) गम् - गच्छ् (१प.प)

अथवा

संस्कृतानुवादं कुरूत। (६तः४) ४
1) Narendra modi is the prime minister of india.
2) Police stops the vehicle.
3) The farmer ploughs the field.
4) Behind the Temple there is mountain.
5) River water is clean.
6) Rahul is searching the file.

१) नरेंद्र मोदी भारताचे पंतप्रधान आहेत.
२) पोलिसांनी वाहन थांबवले.
३) शेतकरी शेताची नांगरणी करतो.
४) मंदिराच्या मागे डोंगर आहे.
५) नदीचे पाणी स्वच्छ आहे
६) राहुल फाईल शोधत आहे.

आ) ५/७ वाक्यात्मकं निबन्धं लिखत।(३ तः१) ५
१) मम प्रिय उत्सवः। २) मम प्रियः कवि। ३) मम प्रियं पुस्तकम्।

अथवा

मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरूत ।



(मञ्जूषा - सूर्यः,पर्वतः, वृक्षः, नदी , जलम् , उदयति , खगः, मेघाः, गुल्मकम् )

पञ्चमः विभागः भाषाभ्यासः | १७

प्रश्न.५) अ) तालिका पूर्ति कुरूत | ८

(१) नामतालिका पूरयत | (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| ....... | ....... | राजभ्यः | चतुर्थी |
| ....... | श्रीमतोः | ....... | षष्ठी |
| वाचि | ....... | ....... | सप्तमी |

(२) सर्वनाम तालिका पूरयत (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| अनया | ....... | ....... | तृतीया |
| ....... | भवन्तौ | ....... | द्वितीया |
| ....... | ....... | अस्मत् | पञ्चमी |

(३) क्रियापदतालिका पूरयत (६ तः ४) २

| ए.व | द्वि.व | ब.व | पुरूष | लकार |
|---|---|---|---|---|
| भवेत् | ....... | ....... | प्र.पु | लिङ् |
| पूजयसे | ....... | ....... | म.पु | लट् |
| ....... | ....... | करवाम | उ.पु | लोट् |

(४) धातुसाधित विशेषण तालिका (६ तः ४) २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ /शानच |
|---|---|---|---|---|
| ज्ञा (९आप) | ....... | ....... | ज्ञातव्यः | जानन् /जानानः |
| प्रच्छ् -पृच्छ् (६ प.प) | पृष्टः | पृष्टवान् | ....... | ....... |
| आ+रूह्+रोह् (१ प.प) | आरूढः | ....... | आरोहणीयः | ....... |

आ) निर्दिष्टाः कृतीः कुरूत | (४ तः ३) ९

१) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्ति कुरूत। (५तः३) ३

क) माता ......(५) मम युतकं प्रक्षलितवती। (आवृत्तिवाचकम्)

ख) भगवताः व्यासेन ........ (१८) पुराणनि रचितानि। (संख्यावाचकम्)

ग) पौषमासः संवत्सरस्य ........ (१०) मासः। ( क्रमवाचकम्)

घ) अस्माकं कुटुम्बं संवत्सरस्य ........(१) पर्यटनार्थं गच्छति। (आवृत्तिवाचकम्)

ड) .........(३) महिलाः जलमाहर्तुं गच्छन्ति। (सङ्ख्यावाचकम्)

२) समासानां तालिकापूर्ति कुरूत |(५ तः ३) ३

| समास | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| शुकसारिकाः | ......... | इतरेतर-द्वन्द्वः। |
| ......... | भारतः नाम देशः | कर्मधारयः। |
| अपरिचितः | न परिचितः। | ......... |
| विद्याविहीनः | ......... | तृतीया - तत्पुरूष। |
| ......... | क्षेत्रस्य पतिः | षष्ठी - तत्पुरूष। |

३) समानार्थकशब्दान् /विरूध्दार्थकशब्दान् लिखत | (५ तः ३) ३

१. सद्गुणाः × .......... | २. नभः = .......... |

३. विपुलम् × .......... | ४. पिता = .......... |

५. समानः × ......... |

४) सूचनानुसारं कृतीः कुरूत | (५ तः ३) ३

१) त्वं धनुः त्यज | ('त्वं' स्थाने 'भवान्' योजयत)

२) जनाः न सन्तुष्टाः | (एकवचने लिखत)

३) किं दृष्टं त्वया ? | (वाच्यपरिर्वनं कुरूत)

४) जनाः वन्यपशून् द्रष्टुम् आगच्छन्ति स्म | (स्म निष्कासयत !)

५) मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत् | (पुर्वकालवाचकं - त्वान्त - अव्ययं निष्कासयत)

## षष्ठः विभाग - अपठितम्। ८

प्रश्न.६.अ) गद्यांशंपठित्वानिर्दिष्टाः कृतीः कुरूत। (६तः४) ४

भारतीय-स्वातन्~यसैनिकानां मध्ये अग्रेसरा मादामकाम-महोदय मुम्बई नगरे, परसीकपरिवारे १८६१ तमे खिस्ताब्दे जनिम् अलभत। सा अतीव मेधाविनी आसीत्। तदा भारते आङ्ग्लशासकानां दमननीतिः असहया जाता आसीत्। अतः भारतीयाः स्वातन्~यार्थ यथाशक्ति प्रयत्नशीलाः आसन्। स्वातन्~यङ्ग्रामे मादामकामायाः सहभागः अपि लक्षणीयः। भारतदेशः कथं स्वतन्त्रः भवते् इति तस्याः महती चिन्ता। एतदर्थे लोकजागरणम् अत्यावश्यकम् इति सा अमन्यत। तदर्थ भाषण -लेखन - प्रकाशन -द्वारा सा लोकजागरणं प्रारभत।

१) पूर्णवाक्येन उत्तरत - मादामकामा - महोदया कुत्र जनिम् अलभत ?

२) प्रातिपदिकं लिखत - (क) भारतीयाः। (ख) सा।

३) वाक्यं पुनर्लिखित्वा सत्यं /असत्यं लिखत।

मादाम कामा लोकजागरणं न आरभत।

४) माध्यमाभाषया सरलार्थ लिखत

भारतदेशः कथं स्वतन्त्रः भवेत् इति तस्याः महती चिन्ता।

५) गद्यांशात् द्वे सप्तमीविभक्तन्तपदे लिखत - .......,.......।

६) कारकपरिचयं कुरूत। <u>स्वातन्त्रयङ्ग्रामे</u> मादामकामायाः सहभागः अपि लक्षणीयः ।

आ) पद्यांश पठित्वा निर्दिष्टाः कृतीः कुरूत। २

यः स्वभावः हि यस्य अस्ति सः नित्यं दुरतिक्रमः ।
श्वानं यदि क्रियते राजा सः किं न अश्नाति उपानहम् ॥

१) पूर्णवाक्येन उत्तरत। (२तः१)

(क) स्वभावः नित्यं किद्दृशम् अस्ति ? (ख) श्वानं किम् अश्नाति ?

२) गद्यांशात् चित्वा समानर्थकं पदं लिखत - सारमेयः ।

इ) पद्यांशं पठित्वाजालरेखाचित्रं पूरयत। २

रविः चन्द्रः घनाः वृक्षाः नदी गावः च सज्जनाः ।
एते परोपकाराय लोके देवेन निर्मिताः ॥




****________****